श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री रामानुजाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री रामानुजाष्टकम् ॥

रामानुजाय मुनये नम उक्तिमात्रम्
कामातुरोऽपि कुमतिः कलयन्नभीष्टम्।
यामामनन्ति यमिनां भगवज्जनानाम्
तामेव विन्दति गतिं तमसः परस्तात्॥ १ ॥

सोमावचूड सुरशेखरदुष्करेण
कामातिदोऽपि तपसा क्षपयन्नघानि।
रामानुजाय मुनये नम इत्यनुक्त्वा
कोवा महीसहचरे कुरुतेनुरागम्॥ २ ॥

रामानुजाय नम इत्यसकृद्गृणीते
यो मान मत्सर मदस्मर दूषितोऽपि।
प्रेमातुरः प्रियतमामपहाय पद्मां
भूमा भुजङ्ग शयनस्तमनुप्रयाति॥ ३ ॥

वामालकासयनवागुरिकागृहीतं
क्षेमाय किञ्चिदपि कर्तुमनीहमानम्।
रामानुजो यतिपतिर्यदि नेक्षते मां
मा मामकोयमिति मुञ्चति माधवोऽपि॥ ४ ॥

रामानुजेति यदिदं विदितं जगत्यां
नामापि न श्रुतिसमीपमुपैति येषाम्।
मा मा मदीय इति सद्भिरुपेक्षितास्ते
रामानुविद्धमनसो निपतन्त्यधोधः॥ ५ ॥

नामानुकीर्त्य नरकार्तिहरं यदीयं
व्योमाधिरोहति पदं सतलोपि लोकः।

www.prapatti.com

रामानुजो यतिपतिर्यदि नाविरासीत्
को यादृशः प्रभविता भवमुत्तरीतुम्॥ ६॥

सीमामहीध्रपदविं पृथिवीमवाप्तुं
वैमानिकेश्वरपुरीमधिवासितुम् वा।
व्योमाधिरोढुमपि न स्पृहयन्ति नित्यं
रामानुजाङ्घ्रियुगळं शरणं प्रपन्नाः॥ ७॥

मा मा धुनोति मनसोऽपि न गोचरं यत्
भूमासखेन पुरुषेण सहानुभूय।
प्रेमानुविद्धहृदय प्रियभक्त लभ्ये
रामानुजाङ्घ्रिकमले रमतां मनो मे॥ ८॥

श्लोकाष्टकमिदं पुण्यं यो भक्त्या प्रत्यहं पठेत्।
आकारत्रयसम्पन्नः शोकाब्धिं तरति ध्रुवम्॥ ९॥

॥ इति श्री रामानुजाष्टकं सम्पूर्णम्॥

www.prapatti.com